# धात्वर्थविचारः

**रामचन्द्रः कण्डेलः (विद्यावारिधिः)**

*सहप्राध्यापकः, कालिकासंस्कृतविद्यापीठम्*

ramchandrakandl@gmail.com

**शोधसारः**

*यद्यपि शब्दा व्युत्पन्ना अव्युत्पन्नाश्च भवन्ति । तथापि निरुक्तकारो यास्क नाम च धातुजमाह निरुक्ते । अतः सर्वेषां शब्दानां मूलं धातुरेव । एतदेव वस्तुतत्त्वं विचार्य वैयाकरणकौण्डभट्टः स्वकीयग्रन्थे वैयाकरणभूषणसारे आदौ धात्वर्थनिरूपणं कृतवान् । नव्यवैयाकरणनागेशेनाऽपि स्वकीये परमलघुमञ्जूषादिग्रन्थेषु धात्वर्थविवेचनं प्रदर्शितम् । मीमांसकाश्च धात्वर्थविवेचनं कृतवन्तः । धात्वर्थस्य प्राथम्यन्तु निश्चितमेव तथापि विदुषां मतानि बहूनि सन्ति । कौण्डभट्टो धातोरर्थौ फलव्यापारौ स्वीकरोति । अत एव एकवृन्तफलद्वयन्यायेन फले व्यापारे च धातूनां पृथक्–पृथक् शक्तिरिति सिद्ध्यति । नागेशस्तु फलावच्छिन्ने व्यापारे व्यापारावच्छिन्ने फले च धातुनां शक्तिः । कर्तृकर्मार्थकतत्प्रत्ययसमभिव्याहरश्च तत्तदबोधे नियामको भवतीति । निष्कर्षस्तु फले व्यापारे च धातोः खण्डशः शक्तिरिति प्राचीनमतमेव ज्यायः । तिङन्तवाच्या क्रिया साध्या भवति । घञन्तदिवाच्या क्रिया सिद्धा । नैयायिकमते फलव्यापारौ द्वावपि धात्वार्थौ, कृतिराख्यातार्थः अनुकूलत्वमाश्रयत्वञ्च संसर्गावाकाङ्क्षाभाष्यौ प्रथमान्तार्थमुख्यविशेष्यकः शाब्दबोधः । मीमांसकमते फलं धात्वर्थः, कर्ता च आक्षेपलभ्यो भवति । मण्डनमिश्रादिमीमांसकैर्विद्वद्भिर्व्यापारस्य प्राधान्यमङ्गीकृतम् । परन्तु प्रत्ययार्थस्य प्राधान्यसंरक्षणाय व्यापारस्य आख्यातार्थत्वं स्वीकृतम् । अतो न साधुत्वमात्रार्थकं व्याकरणशास्त्रमस्ति परन्तु अर्थविशेषपुरस्कारेणैव व्याकरणशास्त्रस्य साधुत्वसम्पादकत्वमस्तीति न तिङो व्यापारार्थकत्वमिति च ।*

**शब्दकुञ्जी**

आख्यातम्, आश्रयः, व्यापारः, शक्तिः, शाब्दबोधः, साध्यः, सिद्धः ।

## विषयप्रवेशः

भाष्ये शब्दानुशासनविषये पतञ्जलिना लक्ष्यलक्षणं व्याकरणमुक्तम् । लक्षणं सूत्रं लक्ष्यः शब्दः । प्रक्रियाग्रन्थे शब्दप्रक्रियाया एव प्राधान्यं भवति । व्याकरणस्य दार्शनिकग्रन्थे लाक्षणिकग्रन्थे चार्थस्य चिन्तनं क्रियते । तस्मात् विदुषां समाजे अर्थस्यैव महङ्खवं प्रदश्र्यते । शब्दार्थयोः नित्यसम्बन्ध उभयोर्महङ्खवञ्च । तस्मादधुना शब्दप्रक्रियां विहाय धातोरर्थचिन्तनं क्रियते । प्रकृतेर्वा प्रत्ययस्य वा अर्थस्य स•तिः कास्तीति चिन्ता सर्वत्रैव भवति । सम्प्रति धातोरर्थे फलस्य व्यापारस्य प्रत्ययानामनेकेषां विदुषां मतान्युपस्थाप्य समाधानं क्रियते ।

## शोधकार्यस्य समस्योद्देश्यञ्च

सर्वे वैयाकरणाः पठन्ति, पाठयन्ति लिखिन्ति च । लेखा बहवो भवन्ति । कोऽपि लेखक एकं विषयमवलम्ब्य वर्णनं विवेचनं वा करोति । धात्वर्थविषये वैयाकरणानां मतानि विविच्य अनुसन्धानस्यावश्यकतैव समस्या एताः सन्ति ।

१.धात्वर्थविषये वैयाकरणानां मतानि कानि सन्ति ?

२. धात्वर्थविषये के के ग्रन्था सन्ति ?

३. वैयाकरणानां धात्वर्थविषये कीदृशो निष्कर्षोऽस्ति ?

वैयाकरणमूर्धन्यानां शाकटायन–कौण्डभट्ट–नागेशादीनां मतानामुपस्थापनम् । तथैव नैयायिक–मीमांसकानां मतानामुपस्थापनम् । वैयाकरणभूषणसार(परमलघुमञ्जूषा(न्यायसिद्धान्तमुक्तवल्यादिग्रन्थानाञ्च अध्ययनं कृत्वानुसन्धानलेखस्य स्थापनमेवोद्देश्यम् ।

१. धात्वर्थविषये कौण्डभट्ट–नागेश–मण्डनमिश्रादिविदुषां मतानां विवेचनम् ।

२. वैयाकरणभूषणसार–परमलघुमञ्जूषा–न्यायसिद्धान्तमुक्तावल्यादिग्रन्थानामध्ययनम् ।

३.वैयाकरणविदुषां मतानि विविच्य धात्वर्थविषये निष्कर्षस्थापनम् ।

## शोधविधिः

प्रस्तुतस्याध्ययनस्य कृते सामग्रीसङ्ढलनार्थं पुस्तकालयस्योपयोगो विहितः । धात्वर्थवर्णितग्रन्थान् वैयाकरणभूषणसार–परमलघुमञ्जूषा–वाक्यपदीयादीन् विविच्य विश्लेषणं कृतम् । अत्र विशेषतो निगमविधेरुपयोगः। विषयेऽस्मिन् व्याकरणस्यानेके ग्रन्थाः लेखाश्च दर्शिताः ।

## विश्लेषणस्य सैद्धान्तिकाधारः

संस्कृतव्याकरणशास्त्रस्य मूलग्रन्थाः मुख्यतया सैद्धान्तिकाधाराः सन्ति । मूलग्रन्थरूपेण सूत्रग्रन्थाः, वार्तिकग्रन्थाः, भाष्यग्रन्थाः, टीकाग्रन्थाः इत्यादयो ग्रन्थाः प्राधान्येन गृह्यन्ते । धात्वर्थविचारक्रमेद्रनुसन्धाने विषयविश्लेषणस्य सैद्धान्तिकाधाररूपेण कौण्डभट्टविरचितवैयाकरणभूषणसारग्रन्थान्तर्गतधात्वर्थनिर्माणप्रकरणं गृहीतमस्ति । तस्य प्रकरणस्य व्याख्यानविश्लेषणक्रमेद्रत्र सम्बद्धकारिकार्थ–वृत्तिवार्तिकपरिभाषेत्यादीनां सम्यग् विवेचनं विहितमस्ति । सन्दर्भेऽस्मिन् वैयाकरणभूषणसार–परमलघुमञ्जूषा–वाक्यपदीय–व्याकरणमहाभाष्यादिग्रन्थाः : सैद्धान्तिकाधारेणाङ्गीकृताः सन्ति ।

## शोधसीमाङ्कनञ्च

अस्मिन् अनुसन्धानलेखप्रसङ्गे धात्वर्थविषयकग्रन्था एव दर्शिताः । धात्वर्थविषये केन्द्रीभूय येषु ग्रन्थेषु धात्वर्थो प्राप्यते तेषामेव ग्रन्थानामुपयोगः कृतः । विशेषतः यास्क–शाकटायन–कौण्डभट्ट– नागेश–पतञ्जल्यादिवैयाकरणानां बीजभूतानि वाक्यानि स्थापितानि । इयमेवानुसन्धानलेखस्य सीमास्ति ।

## धात्वर्थविचारः

सर्वेषां वैदिकलौकिकशब्दानां धातुयोनित्वं स्वीकुर्वन्ति शब्दतङ्खवनिष्णाता विद्वांसः । महावैयाकरणेषु व्याकरणशास्त्रप्रणेता शाकटायनोऽपि सर्वं नाम धातुजमाह । अतः सर्वेषामपि शब्दानां व्युत्पादने धातुरेव मुख्याधार इति फलति । एतदेव वस्तुतङ्खवं विचार्य श्रीमद्भट्टोजिदीक्षितरचितशब्दकौस्तुभमूलकस्य वैयाकरणभूषणसारस्य कर्ता श्रीमत्कौण्डभट्टः प्रथमतः स्वकीये ग्रन्थे धात्वर्थनिरूपणं कृतवान् । तत्र प्रकरणे धात्वर्थप्रतिपादिका द्वाविंशतिकारिकाः समुट्टङ्किता व्याख्याताश्च । यद्यपि संसारेऽस्मिन् धावतीत्यादिवाक्यानामेव व्यवहारो दृश्यते तेनैवार्थबोधश्च सारल्येन जायते । तथापि ज्ञातस्य समस्तार्थस्य सम्बन्धे कियानर्थः प्रकृतेः कियाँश्च प्रत्ययस्येति निश्चयार्थं धात्वर्थविवेचनं सर्वेषां कृतेऽत्यन्तमपेक्षितं वर्तते । वैयाकरणानां मते फलव्यापारौ धात्वथौ तयोर्मध्ये फलजनकत्वाद् व्यापारस्य प्रधानत्वम् । फलं व्यापरजन्यं फलाश्रयः विक्लित्यादि । व्यापारो विक्लितिजनकश्चुल्युपरिधारणाधात्मको भावः । व्यापाराश्रयश्च कर्ता तिङर्थः । इममेवाभिप्रायं विचार्य श्रीमत्कौण्डभट्टः वैयाकरणभूषणसारे

*फलव्यापारयोर्धातुराश्रये तु तिङः स्मृताः ।*

*फले प्रधानं व्यापारस्तिङर्थस्तु विशेषणम् ॥ (कौण्डभट्टः, सन् १९८१, पृ.४) इति कारिकामाह ।*

फलव्यापारयोरिति द्विवचनकथनेन फले व्यापारे च धातोः पृथक्–पृथक् शक्तिरिति सिद्ध्यति । फलावच्छिन्नव्यापारे एकैव विशिष्टशक्तिरिति स्वीकारे तण्डुलान् पचतीत्यादौ तण्डुलानां, चैत्रेण तण्डुलाः पच्यन्ते इत्यादौ व्यापारे चैत्रस्य चान्वयो न स्यात् । तत्कथमिति चेत् "पदार्थः पदार्थेनान्वेति नतु पदार्थैकदेशेनेति" (गदाधरभट्टाचार्यः, वि.सं.२०४१, पृ.७) नियमात् । अत एव एकवृन्तफलद्वयन्यायेन फले व्यापारे च धातूनां पृथक्–पृथक् शक्तिरिति सिद्ध्यति । अत्र नागेशभट्टास्तु फलव्यापारयोर्धातोः पृथक्शक्तावुद्देश्यविधेयभावेनान्वयापत्तिस्तयोः स्यात् । पृथगुपस्थितयोस्तथा अन्वयस्यौत्सर्गिकत्वात् । किञ्चैकपदे व्युत्पत्तिद्वयकल्पनेऽतिगौरवम् । तथाहि– फलविशेषणकव्यापारबोधे कर्तृप्रत्ययसमभिव्याहृतधातुजन्योपस्थितिः कारणम्, व्यापारविशेषणकफलबोधे कर्मप्रत्ययसमभिव्याहृतधातुजन्योपस्थितिः कारणमिति कार्यकारणभावद्वयकल्पनं चातिगौरवम् । तस्मात्फलावच्छिन्ने व्यापारे, व्यापाराच्छिन्ने फले च धातूनां शक्तिः कर्तृकर्मार्थकतत्तत्प्रत्ययसमभिव्याहारश्च तत्तद्बोधे नियामको भवतीति" (भट्टः, २०४१: पृ.१०१) कथयन्ति । वस्तुतः फले व्यापारे च धातोः खण्डशः शक्तिरिति प्राचीनमतमेव ज्यायोद्रस्ति । उद्देश्यविधेयभावेनान्वयनियामकव्युत्पत्तौ धातुभिन्नत्वनिवेशेन दोषाभावात् । व्यापारविशेष्यकबोधं प्रति कर्तृप्रत्ययसमभिव्याहारो हेतुरिति स्वीकारे कार्यकारणभावद्वयकल्पनमपि नापेक्षितम् । एकवृन्तफलद्वयन्यायेन फलव्यापारयोरुभयोरपि पर्यायेण विशेष्यविशेषणत्वञ्चोपपाद्यं भवेत् । "अनन्यलभ्यो हि शब्दार्र्थो" (पतञ्जलिः, सन् १९८८, पृ.६०) भवतीति नियमेन फलस्य व्यापारस्य च धातुलभ्यत्वम्, फलाश्रयः कर्म, व्यापाराश्रयश्च कर्ता, आख्यातार्थो निश्चीयते । वैयाकरणमते व्यापारमुख्यविशेष्यकशाब्दबोधो भवति । तस्मिन् शाब्दबोधे व्यापारे फलं तिङर्थश्च विशेषणत्वेनान्वेति । अतश्चैत्रस्तण्डुलान् पचतीत्यत्र तण्डुलाभिन्नाश्रयनिष्ठविक्लित्यनुकूलो वर्तमानकालिक एकत्वविशिष्टश्चैत्राभिन्नाश्रयनिष्ठो व्यापार इति शाब्दबोधो जायते । प्राचीनवैयाकरणानां मतेऽपि चैत्रेण तण्डुला पच्यन्ते इति वाक्यतोऽपि स एवार्थबोधो जायते । नव्यवैयाकरणमते तु कर्तृप्रत्ययस्थले पूर्वोक्त एव शाब्दबोधो भवति । चैत्रेण

तण्डुलाः पच्यन्ते इत्यत्र एकत्वविशिष्टचैत्राभिन्नाश्रयवृत्तिवर्तमानकालिकव्यापारजन्यतण्डुलाभिन्नाश्रयनिष्ठा विक्लितिरिति शाब्दबोधः सञ्जायते।

फलव्यापारयोर्मध्ये धात्वर्थव्यापारस्य सम्बन्धे साध्यत्वेन क्रियान्तराकाङ्क्षानाकाङ्क्षयोर्दर्शनस्यैव मानमस्ति तथा च क्रियान्तराकाङ्क्षानुत्थापकतावच्छेदकरूपं साध्यत्वं तद्रूपत्वमेवासङ्खवरूपत्वम्, "असत्त्वभूतो भावश्च तिङ्पदैरभिधीयते" (भर्तृहरिः, २०४५, पृ.६५) उक्तञ्च हरिणा। एतदेव समुद्धरति कौण्डभट्टश्चात्र

*यावत्सिद्धमसिद्ध वा साध्यत्वेनाभिधीयते।*

*आश्रितक्रमरूपत्वात् सा क्रियेत्यभिधीयते॥ (कौण्डभट्टः, सन् १९८१, पृ.५)इति। तथा च*

*गुणभूतैरवयवैः समूहः क्रमजन्मनाम्।*

*बुद्ध्या प्रकल्पिताभेदः क्रियेति व्यपदिश्यते॥ (कौण्डभट्टः, सन् १९८१, पृ.६) इति च।*

एतदेव द्रढयति भट्टोजिदीक्षितः –

*साध्यत्वेन क्रिया तत्र धातुरूपनिबन्धना।*

*सिद्धभावस्तु यस्तस्याः स घञादिनिबन्धनः॥ (कौण्डभट्टः, सन् १९८१, पृ.३६)*

तिङन्तवाच्या क्रिया साध्या भवति। घञन्तादिवाच्या क्रिया सिद्धा क्रियास्ति।

*फलव्यापारयोस्तत्र फले तङ्यक्चिणादयः।*

*व्यापारे शप्श्नमाद्यास्तु द्योतयन्त्याश्रयाऽन्वयम्॥ (कौण्डभट्टः,सन् १९८१, पृ.१६)*

## नैयायिकमते

फलव्यापारौ द्वावपि धात्वर्थौ, कृतिराख्यातार्थः अनुकूलत्वमाश्रयत्वञ्च संसर्गावाकाङ्क्षाभाष्यौ प्रथमान्तार्थमुख्यविशेष्यकः शाब्दबोधः। तेन पचति देवदत्तः इत्यत्र "विक्लित्यनुकूलव्यापारानुकूलकृतिमान् एकत्वविशिष्टो देवदत्तः शाब्दबोधः सञ्जायते। कर्मप्रत्ययस्थले तु फलविशेष्यकार्थबोधो जायते। तेन चैत्रेण तण्डुलाः पच्यन्ते इत्यत्र "एकत्वविशिष्टवर्तमानकालिककृतिमच्चैत्रनिष्ठव्यापारजन्यविक्लित्याश्रयास्तण्डुलाः" इति बोधः सम्भवति।

## मीमांसकानां मते

फलं धात्वर्थः, व्यापार आख्यातार्थः, कर्ता च आक्षेपलभ्यो भवति। तथा च देवदत्तः पचतीत्यत्र देवदत्ताभिन्नैककर्तृकवर्तमानकालिको विक्लिङ्खयनुकूलो व्यापारः इत्याख्यातार्थमुख्यविशेष्यकशाब्दबोधः सञ्जायते।

नैयायिकमीमांसकयोर्मतद्वयमपि प्राचीननव्यवैयाकरणेभ्यो न रोचते। अतः कौण्डभट्टाचार्येण स्वाभीष्टयुक्तियुक्तन्यायसङ्गतशाब्दबोधसाधकसत्तर्कैरेतन्मतद्वयं क्रमशः सम्यक् खण्डितम्। तद्यथा नैय्यायिकमते

कृतेराख्यातार्थत्वे रथो गच्छति, तण्डुलाः पच्यन्ते स्वयमेवेति कर्मकर्तृप्रत्ययस्थले रथादावचेतने कृतेरभावात् तृतीयापत्तिर्दुर्वारा।

तथा च आख्यातस्य कृतिवाचकत्वे क्वचित् कर्तुरभिधानम्, क्वचिच्च कर्मणोऽभिधानमिति या व्यवस्था निश्चिताऽस्ति सा सर्वथोच्छिन्ना स्यात्।

"भावप्रधानमाख्यातं सत्त्वप्रधानानि नामानि" (पतञ्जलिः, सन् १९८८, पृ.४०.) इत्यादि भूवादिसूत्रस्य भाष्यात् धात्वर्थभावनायाः प्रत्ययार्थापेक्षया प्राधान्यं निश्चीयते । "प्रत्ययार्थवचनमर्थस्यान्यप्रमाणत्वात्" इति सूत्रेणाप्ययमर्थः प्रतिपाद्यते। अतः प्रथमान्तार्थमुख्यविशेष्यकनैय्यायिकसम्मतशब्दार्थबोधोऽपि न युक्तियुक्तः। आख्यातार्थसङ्ख्यायाः प्रथमान्तार्थेऽन्वयात्।

मण्डनमिश्रादिमीमांसकैर्विद्वद्भिर्व्यापारस्य प्राधान्यमङ्गीकृतम्, परन्तु प्रत्ययार्थस्य प्राधान्यसंरक्षणाय व्यापारस्य आख्यातार्थत्वं स्वीकृतम्। तथा च घटं भावयतीत्यत्रेव घटो भवति इत्यत्रापि धात्वर्थोत्पत्तिरूपफलाश्रयत्वेन घटस्य कर्मतापत्तौ द्वितीयाविभक्त्यापत्ते नैय्यायिकमीमांसकयोर्मतद्वयमपि न प्रमाणिकम्।

*सम्बन्धमात्रमुक्तञ्च श्रुत्या धात्वर्थभावयोः।*

*तदेकांशनिवेशे तु व्यापारोऽस्या न विद्यते॥ (कौण्डभट्टः, सन् १९८१, पृ.२५)*

क्रियात्वमेव हि कारकान्वयितावच्छेदकं भवतीति कथितमस्ति। तदेतदाविष्कर्तुं विवरणेन धात्वर्थक्तवत्वर्थयोः कर्मत्वकर्तृत्वे प्रदर्शिते कृतवान् पाकमिति। व्यापारस्याख्यातार्थत्वे अपरं दूषणमाह भूषणकारिकाकारः–

*भेद्यभेदकसम्बन्धोपाधिभेदनिबन्धनम्।*

*साधुत्वं तदभावेऽपि बोधो नेह निवार्यते॥ (कौण्डभट्टः, सन् १९८१, पृ.४४)*

भेद्यं विशेष्यं, भेदकं विशेषणं, तयोर्यः सम्बन्धस्तस्य यो भेदस्तन्निबन्धनं साधुत्वमिति । व्याकरणस्मृतिः शब्दसाधुत्वपरा, तत्रैव व्याकरणस्मृतौ अवच्छेदकतया कल्प्यमानधर्मस्य शक्तित्वं वदतां मीमांसकानां मते शक्तत्वमेव साधुत्वमेवेति तद्रीत्या विचारे साधुत्वनिर्णये शक्तिनिर्णयो भवति। अतिरिक्तशक्तिवादे आख्यातानामसाधुतया भावनायां स्यादेव । तथा च चतुर्थ्यर्थे तृतीयाप्रयोगवद् धात्वर्थभावनायामाख्यातप्रयोगे याज्ञे कर्मण्यसाधुशब्दप्रयोगाद् "नानृतं वदेत्" इति निषेधोल्लङ्घनप्रयुक्तं प्रायश्चित्तं मीमांसकीयव्युत्पत्तिमतां स्यादेवेति महाननर्थः।

*शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्याद् व्यवहारतश्च।*

*वाक्यस्य शेषाद् विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः॥*

(भट्टाचार्यः, सन् १९८७, पृ.५०)

इत्यभियुक्तोक्तवस्तुस्थित्यनुसारेण शक्तिग्राहकेषु व्याकरणशास्त्रस्य प्राधान्यं सर्वैः शास्त्रकारैर्निःशङ्कमङ्गीकृतं वर्तते। अतो न साधुत्वमात्रार्थकं व्याकरणशास्त्रमस्ति परन्तु अर्थविशेषपुरस्कारेणैव व्याकरणशास्त्रस्य साधुत्वसम्पादकत्वमस्तीति न तिङो व्यापारार्थकत्वमिति च धात्वर्थविचारसङ्क्षेपः।

## निष्कर्षः

व्याकरणशास्त्रे धात्वर्थविवेचनस्य विशिष्टं स्थानम् । धात्वर्थप्रसङ्गे वैयाकरणविदुषां मतानि बहूनि सन्ति । तस्माद् तेषां मतानि विविच्यात्र उदाहरणान्यपि स्थापितानि । मतानां सामञ्जस्यं च स्थापितम् । भावप्रधानमाख्यातं सत्त्वप्रधानानि नामानि इत्यादि भूवादिसूत्रस्थभाष्यात् धात्वर्थभावनायाः प्रत्ययार्थपेक्षया प्राधान्यं निश्चीयते । तस्माद् नामपदानां क्रियापदानां प्रत्ययानां धातुर्धात्वर्थश्च कारणमिति दिक् ।

## कृतज्ञताज्ञापनम्

लेखस्यास्य प्राविधिकदृष्ट्या विषयप्रतिपादनदृष्ट्या च परीक्षणं विधाय सम्पादनाय परिष्काराय च परामर्शं प्रदाय महदुपकारं कृतवद्भ्यो विज्ञगुरुजनेभ्यः, अन्येभ्यः सहयोगिभ्यश्च सश्रद्धं सधन्यवादञ्च कृतज्ञतां व्यनज्मि ।

## सन्दर्भग्रन्थाः

१. पाणिनिः, (सन् २०१५), अष्टाध्यायी, 'सरला' वृत्तिविराजितः, व्याख्याकारः गुरुप्रसादशास्त्री, वाराणसीः चौखम्बा सुरभारती ।

२. विश्वनाथ पञ्चाननभट्टाचः(सन्१९८७), न्यायसिद्धान्तमुक्तावली, व्याख्याता पं. सूर्यनारायणशुक्लः, वाराणसीः श्रीहरिकृष्णनिबन्धभवनम् ।

३. नागेशभट्टः, (वि.सं.२०४१), परमलघुमञ्जूषा, व्याख्याता जयशङ्करलाल त्रिपाठी, भावप्रकाशिका (संस्कृत-हिन्दीटीका), वाराणसीः कृष्णदास अकादमी ।

४. पतञ्जलिः, (सन् १९८८), व्याकरणमहाभाष्यम्, व्याख्याता श्रीगुरुप्रसादशास्त्री, वाराणसीः, वाणीविलासप्रकाशनम् ।

५. भर्तृहरिः, (वि.सं.२०४५), वाक्यपदीयम्, ब्रह्मकाण्डम्, टीकाकाररघुनाथशर्मा, अम्बाकर्त्री टीका, वाराणसीः सम्पूर्णानन्द–संस्कृत विश्वविद्यालयः ।

६. कौण्डभट्टः, (सन् १९८१), वैयाकरणभूषणसारः, सम्पादकः पं. गोपालशास्त्री नेने, वाराणसीः, चौखम्बा अमरभारतीप्रकाशनम् ।

७. गदाधरभट्टाचार्यः, (वि.सं.२०४१) व्युत्पत्तिवादः, टीकाकारः पं. सुदर्शनाचार्यः, आदर्शटीका, वाराणसीः, वाणीविलासप्रकाशनम् ।